## Shivapuja Stotram of Jnanashambhu

प्रातः शङ्करचिन्तनस्नपनसंसेकासुसंरोधनैः
सन्ध्यासंस्मृतिमार्जनाघशमनोपस्थानसन्तर्पणैः ।
द्वारस्यार्चनयागधामगतविघ्नोद्वासनाद्यैः प्रभोः
यः श्रीमान् यजनं करोति भवतस्तस्यैव सिद्धिद्वयम् ॥ १ ॥

एकैवार्थत ईशशक्तिरमिता यानेकरूपा शिवा
कालोपाधिवशाद् द्विजास्त्वनुदिनं ब्राह्म्यादिरूपेण ताम् ।
ध्यायन्त्यत्र तु निर्मलात्मशिवयोः सन्धिश्च शैवी पुरा
सन्ध्यातः शिव एव साधकवरैर्ध्येयः सदा निर्मलः ॥ २ ॥

प्रातः स्मरामि हृदयाब्जस्वमध्यसंस्थं
चन्द्रार्कमार्गविरहोदितचित्स्वरूपम् ।
ध्येयं सदा मुनिवरैरपवर्गसिद्ध्यै
विश्वात्मकं सदसदन्तमनन्तमीशम् ॥ ३ ॥

मध्यन्दिने शतसहस्रनिशाकराभं
विश्वेश्वरं परमकारणमप्रमेयम् ।
शम्भुं सदोदितममायवियत्स्वरूपं
कोदण्डमध्यनिलयं नियतं स्मरामि ॥ ४ ॥

ब्रह्माक्षरं निशिमुखेऽमृतसागराभं
विश्वाधिपं शिवमनूत्थितनादसंस्थम् ।
बोधामृतं करणकारणकार्यहीनं
तं ब्रह्मरन्ध्रनिलयं नियतं स्मरामि ॥ ५ ॥

तेजोनिधानमचलं शिवमर्धरात्रे
नित्यं निरस्तविषयैः परमार्थदृग्भिः ।
विज्ञेयमव्ययमचिन्त्यमभावनीयं

उन्मन्यतीतविषयं सततं स्मरामि || ६ ||

क्ष्मादिग्रन्थ्यन्ततत्त्वक्रमनिहितपदाक्रान्तसंशुद्धविद्या-
तत्त्वान्तव्यापिसादाशिवविशदपदं भावयन्नात्मरूपम् |
शैवज्ञानप्रसिद्धप्रवरविधिगताशेषसत्कृत्यकारी
जीवं हृद्येव कुर्याद्द्विविशशिदहनव्योमशक्त्यन्तरस्थम् || ७ ||

आयामैः श्वसनस्य भौतिकमलं देहं कलाभिः सुधीः
यः पञ्चाध्वविसर्पिणीभिरनिशं संशोध्य तच्छम्बरैः |
मन्त्रालङ्कृतदेहभृन्निशि दिवा सन्ध्यासु सन्तोषय-
न्नर्चाहोमसमाधिभिः शिवमसौ संयाति शैवं पदम् || ८ ||

य एष देवो महतो महीयान्
अणोरणीयान् भवभीरुभिः सः |
ज्ञेयः शिवः सर्वगतः शरीरे
ध्येयः स पूज्यः शिवलिङ्गमध्ये || ९ ||

हृत्पद्माख्यशिवालये मनसिजे तत्कर्णिकाख्ये क्रिया-
पीठे ज्ञानमयं विशुद्धमनसा संस्थाप्य नादात्मना |
लिङ्गं तच्च सुधामयेन पयसा संस्नाप्य सम्यक्पुनः
वैराग्येन च चन्दनेन वसुभिः पुष्पैरहिंसादिभिः || १० ||

प्राणायामभवेन धूपविधिना चिद्दीपदानेन यः
प्रत्याहारमयेन सोमहविषा सौषुम्नजापेन च |
तच्चित्ते बहुधारणाभिरमलध्यानोद्भवैर्भूषणैः
तत्साम्यानि निवेदनेन यजते धन्यः स एवामलः || ११ ||

चन्द्रस्राविसुधामयेन हविषा नाभिस्थकुण्डेऽनलं
सन्तर्प्येशमयं शिवास्पदगतव्योम्नि स्थिते सर्वगे |
कन्दोद्भूतशिवाणुनादशिखया वृत्त्यात्मसंवेदनं
शैवे ज्योतिषि यः करोति पुरुषो मुक्तः स एवाक्षयः || १२ ||

यथावदात्माश्रयवस्तुमन्त्रस्वायत्तलिङ्गादिषु शोधितेषु |
सिद्धान्तमार्गस्थितसाधकानां त्वत्पूजनं नात्र विलोमतोऽस्तु || १३ ||

धारिकाभिधशक्तिबीजमनन्तपङ्कजकुड्मलं
पुण्यबोधविरागभूतिपदं विलोमचतुष्टयम् |
गात्रकं छदनद्वयं कमलं सकेसरकर्णिकं
शक्तिमण्डलसङ्घयुक्तमहं नमामि शिवासनम् || १४ ||

पृथ्वीकन्दं कलातत्त्वान्तनालं
लोकौघं तत्कण्टकं भावसूत्रम् |
ग्रन्थिग्रन्थिं शुद्धविद्यासरोजं
विद्येशानारूढपत्राष्टकं च || १५ ||

वामादिशक्तिगतकेसरकर्णिकाढ्यं
अर्कादिबिंबसहितं वरयोगपीठम् |
तत्र स्थितं हृदयमन्त्रगतात्ममन्त्र-
मूर्तिं च बिन्दुगतमीशमहं नमामि || १६ ||

तत्कन्दं शतकोटियोजनमितं नालं परार्धान्तकं
ग्रन्थिः कोटिपरार्धपश्चिमसहस्रोऽब्जं च तल्लक्षकम् |
मूर्तिस्तस्य च कोटिरीश्वरमयी तस्यार्बुदस्यार्बुदा-
म्भोजं मन्त्रमयं सदाशिववपुस्तद्वानमेयः शिवः || १७ ||

यस्यामौषधभूषणध्वनिमयी मूर्तिः परा बैन्दवी
ध्येया शङ्करमन्त्रतन्त्रनिरतैर्ज्ञानक्रियाङ्गी शिवा |
सर्वैश्वर्यसुखप्रदा निरुपमा सादाशिवी निर्मला
नादाख्याय सदाशिवाय महते शान्ताय तस्मै नमः || १८ ||

ध्येयः सदा गगनमण्डलमध्यवर्ती
निर्विघनशुद्धशिवयोगिहृदम्बुजस्थः |

ईशोर्ध्वनिष्कलशिवान्तवपुः सदेशो
बिन्दुः स्वरोद्भवकलाभुवनेशगर्भः || १९ ||

योऽसावीशानमूर्धा नरमुखकमलोऽघोरहृद्वामगुह्यः
सद्योमूर्तिः पुरेशाननहृदयपदः षड् विधाध्वस्वरूपः |
भूताम्भोराशिसिद्धिस्मरभुजगकलाक्लृप्तदेहः क्रियेच्छा-
दृङ्मासाधम्बिकं तं कबिलगतमहं नौमि विद्याशरीरम् || २० ||

श्वेतासृक्कृष्णपीतस्फटिकशशिसुवर्णारुणाल्यग्निवर्णैः
ब्रह्माङ्गैर्व्यक्तमूर्तिर्भवहरशिवसंयोगतः स्फाटिकाभः |
ऐक्यान्मन्त्रार्थयोरित्यखिलशिवमतेष्वाह सर्वार्थहेतुः
वक्त्राणां वर्णभेदश्चिदचिदधिपतेश्चित्रमेतत्स्वरूपम् || २१ ||

इशानेन वियन्मयेन धवलप्रख्येन सर्वप्रभोः
व्याप्तं वक्त्रचतुष्टयं पुरुषहृद्गुह्याजमन्त्रात्मकम् |
तेनेदं धवलप्रभं शिवविदः पूर्वादिकाष्ठाभृतां
वर्णानुग्रहहेतुतः प्रतिमुखं पीतादिवर्णं विदुः || २२ ||

ईशतत्पुरुषाघोरवामाजवदनं शिवम् |
बालयौवनवृद्धस्त्रीनराकारं नमाम्यहम् || २३ ||

त्रिशूलखट्वाङ्गधरः सशक्तिर्वराब्जहस्तोऽभयपाणिरीशः |
सेन्दीवराहिडमरुप्रसक्तः सबीजपूरः सुभगोऽक्षसूत्री || २४ ||

बोधानन्दमयी विभोर्भवभयप्रध्वंसकृच्छक्तयः
तिस्रस्ताः परिणामतश्च विवृतिर्निःशेषबीजस्य हि |
तत्पूर्णं प्रकृतिः कलाद्यभिमुखीदीर्घाक्षसूत्रं मनः
शम्भोरस्त्रनिकाय आगमपरैर्ज्ञेयः परो नापरः || २५ ||

ईशानं सर्वासां विद्यानामीश्वरं च भूतानाम् |
ब्रह्माधिपतिं ब्रह्मत्वान्निष्कलरूपं सदाशिवं नौमि || २६ ||

तत्पुरुषं भक्तानां शैवज्ञानप्रदं महादेवम् |
रुद्रं शिवत्वसिद्ध्यै तत्त्वप्रेरकमहं वन्दे || २७ ||

अथ घोरमघोरं पशुपाशनिराकरणं घोरघोरतरम् |
सर्वस्माच्छरणमहं शर्वं बहुरूपिणं वन्दे || २८ ||

वामं ज्येष्ठं रौद्रं कलविकरणं बलविकरणं कान्तम् |
बलप्रमथनं सर्वभूतदमनं मनोन्मनमहं वन्दे || २९ ||

सद्योजातं सर्वज्ञं प्रणतानां भवभयापहरम् |
अतिभवयोजकममलं भवोद्भवं नौमि जगदधिपम् || ३० ||

श्रीमन्मूलमनूत्थनादशिखया ब्रह्मादिसादाशिव-
स्थानत्यागगतिक्रमोर्ध्वविलसद्व्योमान्तसंस्थाय ते |
बोधानन्दमयाय सर्वविभवे नित्याय विश्वात्मने
शुद्धायामलतेजसे च महते तस्मै परस्मै नमः || ३१ ||

चन्द्रयुग्मगुणार्थमात्रतदर्धतद्दलषोडश-
द्व्युत्तरत्रिदशाब्धिषष्टिभुजङ्गमश्रवणक्षमा |
दर्शनेषुकराम्शभावमितोन्मनी परमाशनं
यस्य तं प्रणतोऽस्मि निष्कलमव्ययं परमं शिवम् || ३२ ||

आदिपञ्चममृत्युभूषणचन्द्रखण्डगुणाश्रदृ-
ग्भानुगध्वनिसीरभास्करसेन्दुवृत्तहलाकृतिः |
सांशुमत् त्रिशिखद्विबिम्बगतद्विकुब्जग उन्मना
पातु वः सकलापरः सकलाकलः सकलः शिवः || ३३ ||

निष्कलं शिवरुद्रपुद्गलभूषणार्धहिमांशुम-
द्रोधिदण्डतदन्तशक्तिचतुष्टयेश्वरयोगिनम् |
शङ्करं वसुसागराङ्गुलचारिणं रसशून्यगं

सर्वमन्त्रपतिं प्रासादमहं नतोऽस्मि षडध्वगम् || ३४ ||

चिद्धक्तिसंस्थित्यवलोकरोधैर्मुद्रोत्तरैरङ्गशिवैकभावैः |
पादाचमाघर्यप्रसवप्रदानैस्त्वदर्चनं जन्मफलं महेश || ३५ ||

आवाहनं स्वात्मनि चित्प्रकाशस्तत्र स्थितिः स्थापनमीश्वरस्य |
सान्निध्यमात्मेश्वरसन्निधानं संरोधनं स्वस्य शिवे निरोधः || ३६ ||

नमोऽस्तु संज्ञानहृदे भवाय
नमो गुणैश्वर्यविशिष्टमूर्तये |
नमोऽपराधीनवशित्वरूप-
शिखाय तेजःकवचात्मने नमः || ३७ ||

स्वभावशुद्धस्य शिवस्य पादमाचाममात्मीयविशुद्धिहेतोः |
अघर्यप्रदानं कुसुमार्पणं च सदेशधामाप्तिनिमित्तमेतत् || ३९ ||

स्नानं स्वात्ममलापहं शुभमयैर्गन्धैः समालेपनं
सद्वस्त्राभरणं सुगन्धिकुसुमैर्मालाभिरभ्यर्चनम् |
सालङ्कारसदाशिवस्य विधिवद्धूपप्रदानं त्वणोः
भोगार्थं हि सदेशधाम्नि विमलं दीपं शिवज्ञानदम् || ४० ||

शुचीशरक्तपानिलेन्द्रमृत्युकेन्दुसंस्थितान्
पयोधरार्कवातवह्निसन्निभानिनेक्षणान् |
युगाननान् वराभयत्रिशूलशक्तियुक्करान्
नमः शिवाङ्गसम्भवान् हृदादिमन्त्रविग्रहान् || ४१ ||

भोगाङ्गार्चनमात्मनः शिवगुणप्राप्त्यर्थमैक्यं प्रभोः
अङ्गानां पुनरर्चकस्य शिवसंयोगाय शुद्धात्मनः |
तृप्तस्यान्ननिवेदनाम्बुमुखवासादिप्रदानं मन-
स्तृप्त्यर्थं शिवभावमङ्गलकरं चित्रं तदर्चाफलम् || ४२ ||

पवित्रभूतस्य पवित्रदानं
तापत्रयघनं सकलार्थसिद्ध्यै |
जपश्च भक्त्या प्रणतिः शिवस्य
ब्रह्मेन्द्रविष्ण्वादि पदत्वहेतुः || ४३ ||

अर्चने सकलं जपे सकलाकलं सततोदितं
निष्कलं सकलाध्वगं परिपूर्णमात्मसमर्पणे |
व्योम्नि सुस्फटिकप्रभं भवने कलासहितं हरं
यो हि वेत्ति परं शिवं शिव एव सोऽस्त्र न संशयः || ४४ ||

भूयः पूजनमीशसन्निधिकरं संप्रार्थनं स्वेशयोः
अन्योन्यं त्ववलोकनाय भुवने भोगाय सादाशिवे |
ईशाग्र्यर्चनमर्पणं क्षपयितुं बन्धत्रयं कर्मणो
ज्ञेयं स्वात्मनिवेदनं परशिवे स्थित्यर्थमेवात्मनः || ४५ ||

अशुद्धतत्त्वौघबहिष्क्रियार्थं
पराङ्मुखाघर्यं परमेश्वरस्य |
यस्मिन्नवस्थानकरं विसर्गं
कुर्वन् स शैवं पदमभ्युपेति || ४६ ||

विप्रोत्तुङ्गश्चोलदेशी च सूरिः
शम्भोः पूजास्तोत्रमेतत्पवित्रम् |
सिद्धान्तज्ञो ज्ञानशम्भुः शिवोक्त्या
चक्रे भक्त्या भुक्तये मुक्तये च || ४७ ||

||इति शिवम् ||

prātaḥ śaṅkaracintanasnapanasaṃsekāsusaṃrodhanaiḥ
sandhyāsaṃsmṛtimārjanāghaśamanopasthānasantarpaṇaiḥ |
dvārasyārcanayāgadhāmagatavighnodvāsanādyaiḥ prabhoḥ

yaḥ śrīmān yajanaṃ karoti bhavatastasyaiva siddhidvayam
|| 1 ||

ekaivārthata īśaśaktiramitā yānekarūpā śivā
kālopādhivaśād dvijāstvanudinaṃ brāhmyādirūpeṇa tām |
dhyāyantyatra tu nirmalātmaśivayoḥ sandhiśca śaivī purā
sandhyātaḥ śiva eva sādhakavarairdhyeyaḥ sadā nirmalaḥ
|| 2 ||

prātaḥ smarāmi hṛdayābjasvamadhyasaṃsthaṃ
candrārkamārgavirahoditacitsvarūpam |
dhyeyaṃ sadā munivarairapavargasiddhyai
viśvātmakaṃ sadasadantamanantamīśam || 3 ||

madhyandine śatasahasraniśākarābhaṃ
viśveśvaraṃ paramakāraṇamaprameyam |
śambhuṃ sadoditamamāyaviyatsvarūpaṃ
kodaṇḍamadhyanilayaṃ niyataṃ smarāmi || 4 ||

brahmākṣaraṃ niśimukhe.amṛtasāgarābhaṃ
viśvādhipaṃ śivamanūtthitanādasaṃstham |
bodhāmṛtaṃ karaṇakāraṇakāryahīnaṃ
taṃ brahmarandhranilayaṃ niyataṃ smarāmi || 5 ||

tejonidhānamacalaṃ śivamardharātre
nityaṃ nirastaviṣayaiḥ paramārthadṛgbhiḥ |
vijñeyamavyayamacintyamabhāvanīyaṃ
unmanyatītaviṣayaṃ satataṃ smarāmi || 6 ||

kṣmādigranthyantatattvakramanihitapadākrāntasaṃśuddhavi
dyā-
tattvāntavyāpisādāśivaviśadapadaṃ bhāvayannātmarūpam |
śaivajñānaprasiddhapravaravidhigatāśeṣasatkṛtyakārī
jīvaṃ hṛdyeva kuryādraviśaśidahanavyomaśaktyantarastham
|| 7 ||

āyāmaiḥ śvasanasya bhautikamalaṃ dehaṃ kalābhiḥ sudhīḥ

yaḥ pañcādhvavisarpiṇībhiraniśaṃ saṃśodhya tacchambaraiḥ |
mantrālaṅkṛtadehabhṛnniśi divā sandhyāsu santoṣaya-
nnarcāhomasamādhibhiḥ śivamasau saṃyāti śaivaṃ padam || 8 ||

ya eṣa devo mahato mahīyān
aṇoraṇīyān bhavabhīrubhiḥ saḥ |
jñeyaḥ śivaḥ sarvagataḥ śarīre
dhyeyaḥ sa pūjyaḥ śivaliṅgamadhye || 9 ||

hṛtpadmākhyaśivālaye manasije tatkarṇikākhye kriyā-
pīṭhe jñānamayaṃ viśuddhamanasā saṃsthāpya nādātmanā |
liṅgaṃ tacca sudhāmayena payasā saṃsnāpya samyakpunaḥ
vairāgyena ca candanena vasubhiḥ puṣpairahiṃsādibhiḥ || 10 ||

prāṇāyāmabhavena dhūpavidhinā ciddīpadānena yaḥ
pratyāhāramayena somahaviṣā sauṣumnajāpena ca |
taccitte bahudhāraṇābhiramaladhyānodbhavairbhūṣaṇaiḥ
tatsāmyāni nivedanena yajate dhanyaḥ sa evāmalaḥ || 11 ||

candrasrāvisudhāmayena haviṣā nābhisthakuṇḍe.analaṃ
santarpyeśamayaṃ śivāspadagatavyomni sthite sarvage |
kandodbhūtaśivāṇunādaśikhayā vṛttyātmasaṃvedanaṃ
śaive jyotiṣi yaḥ karoti puruṣo muktaḥ sa evākṣayaḥ || 12 ||

yathāvadātmāśrayavastumantrasvāyattaliṅgādiṣu śodhiteṣu |
siddhāntamārgasthitasādhakānāṃ tvatpūjanaṃ nātra vilomato.astu || 13 ||

dhārikābhidhaśaktibījamanantapaṅkajakuḍmalaṃ
puṇyabodhavirāgabhūtipadaṃ vilomacatuṣṭayam |
gātrakaṃ chadanadvayaṃ kamalaṃ sakesarakarṇikaṃ
śaktimaṇḍalasaṅghayuktamahaṃ namāmi śivāsanam || 14 ||

pṛthvīkandaṃ kalātattvāntanālaṃ
lokaughaṃ tatkaṇṭakaṃ bhāvasūtram |
granthigranthiṃ śuddhavidyāsarojaṃ
vidyeśānārūḍhapatrāṣṭakaṃ ca || 15 ||

vāmādiśaktigatakesarakarṇikāḍhyaṃ
arkādibiṃbasahitaṃ varayogapīṭham |
tatra sthitaṃ hṛdayamantragatātmamantra-
mūrtiṃ ca bindugatamīśamahaṃ namāmi || 16 ||

tatkandaṃ śatakoṭiyojanamitaṃ nālaṃ parārdhāntakaṃ
granthiḥ koṭiparārdhapaścimasahasro.abjaṃ ca
tallakṣakam |
mūrtistasya ca koṭirīśvaramayī tasyārbudasyārbudā-
mbhojaṃ mantramayaṃ sadāśivavapustadvānameyaḥ śivaḥ ||
17 ||

yasyāmauṣadhabhūṣaṇadhvanimayī mūrtiḥ parā baindavī
dhyeyā śaṅkaramantratantraniratairjñānakriyāṅgī śivā |
sarvaiśvaryasukhapradā nirupamā sādāśivī nirmalā
nādākhyāya sadāśivāya mahate śāntāya tasmai namaḥ || 18
||

dhyeyaḥ sadā gaganamaṇḍalamadhyavartī
nirvighnaśuddhaśivayogihṛdambujasthaḥ |
īśordhvaniṣkalaśivāntavapuḥ sadeśo
binduḥ svarodbhavakalābhuvaneśagarbhaḥ || 19 ||

yo.asāvīśānamūrdhā naramukhakamalo.aghorahṛdvāmaguhyaḥ
sadyomūrtiḥ pureśānanahṛdayapadaḥ ṣaḍ vidhādhvasvarūpaḥ
|
bhūtāmbhorāśisiddhismarabhujagakalāklptadehaḥ
kriyecchā-
dṛṅmāsārdhāmbakaṃ taṃ kabilagatamahaṃ naumi
vidyāśarīram || 20 ||

śvetāsṛkkṛṣṇapītasphaṭikaśaśisuvarṇāruṇālyagnivarṇaiḥ

brahmāṅgairvyaktamūrtirbhavaharaśivasaṃyogataḥ
sphāṭikābhaḥ |
aikyānmantrārthayorityakhilaśivamateṣvāha
sarvārthahetuḥ
vaktrāṇāṃ varṇabhedaścidacidadhipateścitrametatsvarūpam
|| 21 ||

iśānena viyanmayena dhavalaprakhyena sarvaprabhoḥ
vyāptaṃ vaktracatuṣṭayaṃ puruṣahṛdguhyājamantrātmakam |
tenedaṃ dhavalaprabhaṃ śivavidaḥ pūrvādikāṣṭhābhṛtāṃ
varṇānugrahahetutaḥ pratimukhaṃ pītādivarṇaṃ viduḥ ||
22 ||

īśatatpuruṣāghoravāmājavadanaṃ śivam |
bālayauvanavṛddhastrīnarākāraṃ namāmyaham || 23 ||

triśūlakhaṭvāṅgadharaḥ
saśaktirvarābjahasto.abhayapāṇirīśaḥ |
sendīvarāhiḍamaruprasaktaḥ sabījapūraḥ
subhago.akṣasūtrī || 24 ||

bodhānandamayī vibhorbhavabhayapradhvaṃsakṛcchaktayaḥ
tistrastāḥ pariṇāmataśca vivṛtirniḥśeṣabījasya hi |
tatpūrṇaṃ prakṛtiḥ kalādyabhimukhīdīrghākṣasūtraṃ manaḥ
śambhorastranikāya āgamaparairjñeyaḥ paro nāparaḥ || 25
||

īśānaṃ sarvāsāṃ vidyānāmīśvaraṃ ca bhūtānām |
brahmādhipatiṃ brahmatvānniṣkalarūpaṃ sadāśivaṃ naumi
|| 26 ||

tatpuruṣaṃ bhaktānāṃ śaivajñānapradaṃ mahādevam |
rudraṃ śivatvasiddhyai tattvaprerakamahaṃ vande || 27
||

atha ghoramaghoraṃ paśupāśanirākaraṇaṃ ghoraghorataram
|
sarvasmāccharaṇamahaṃ śarvaṃ bahurūpiṇaṃ vande || 28 ||

vāmaṃ jyeṣṭhaṃ raudraṃ kalavikaraṇaṃ balavikaraṇaṃ kāntam |
balapramathanaṃ sarvabhūtadamanaṃ manonmanamahaṃ vande || 29 ||

sadyojātaṃ sarvajñaṃ praṇatānāṃ bhavabhayāpaharam |
atibhavayojakamamalaṃ bhavodbhavaṃ naumi jagadadhipam || 30 ||

śrīmanmūlamanūtthanādaśikhayā brahmādisādāśiva-
sthānatyāgagatikramordhvavilasadvyomāntasaṃsthāya te |
bodhānandamayāya sarvavibhave nityāya viśvātmane
śuddhāyāmalatejase ca mahate tasmai parasmai namaḥ || 31 ||

candrayugmaguṇārthamātratadardhataddalaṣoḍaśa-
dvyuttaratridaśābdhiṣaṣṭibhujaṅgamaśravaṇakṣamā |
darśaneṣukarāṃśabhāvamitonmanī paramāśanaṃ
yasya taṃ praṇato.asmi niṣkalamavyayaṃ paramaṃ śivam || 32 ||

ādipañcamamṛtyubhūṣaṇacandrakhaṇḍaguṇāśradṛ-
gbhānugadhvanisīrabhāskarasenduvṛttahalākṛtiḥ |
sāṃśumat triśikhadvibimbagatadvikubjaga unmanā
pātu vaḥ sakalāparaḥ sakalākalaḥ sakalaḥ śivaḥ || 33 ||

niṣkalaṃ śivarudrapudgalabhūṣaṇārdhahimāṃśuma-
drodhidaṇḍatadantaśakticatuṣṭayeśvarayoginam |
śaṅkaraṃ vasusāgarāṅgulacāriṇaṃ rasaśūnyagaṃ
sarvamantrapatiṃ prāsādamahaṃ nato.asmi ṣaḍadhvagam || 34 ||

cidvyaktisaṃsthityavalokarodhairmudrottarairaṅgaśivaika bhāvaiḥ |
pādācamārghyaprasavapradānaistvadarcanaṃ janmaphalaṃ maheśa || 35 ||

āvāhanaṃ svātmani citprakāśastatra sthitiḥ
sthāpanamīśvarasya |
sānnidhyamātmeśvarasannidhānaṃ saṃrodhanaṃ svasya śive
nirodhaḥ || 36 ||

namo.astu saṃjñānahṛde bhavāya
namo guṇaiśvaryaviśiṣṭamūrtaye |
namo.aparādhīnavaśitvarūpa-
śikhāya tejaḥkavacātmane namaḥ || 37 ||

svabhāvaśuddhasya śivasya
pādamācāmamātmīyaviśuddhihetoḥ |
arghyapradānaṃ kusumārpaṇaṃ ca
sadeśadhāmāptinimittametat || 39 ||

snānaṃ svātmamalāpahaṃ śubhamayairgandhaiḥ samālepanaṃ
sadvastrābharaṇaṃ sugandhikusumairmālābhirabhyarcanam |
sālaṅkārasadāśivasya vidhivaddhūpapradānaṃ tvaṇoḥ
bhogārthaṃ hi sadeśadhāmni vimalaṃ dīpaṃ śivajñānadam
|| 40 ||

śucīśaraktapānilendramṛtyukendusaṃsthitān
payodharārkavātavahnisannibhāninekṣaṇān |
yugānanān varābhayatriśūlaśaktiyukkarān
namaḥ śivāṅgasambhavān hṛdādimantravigrahān || 41 ||

bhogāṅgārcanamātmanaḥ śivaguṇaprāptyarthamaikyaṃ
prabhoḥ
aṅgānāṃ punararcakasya śivasaṃyogāya śuddhātmanaḥ |
tṛptasyānnanivedanāmbumukhavāsādipradānaṃ mana-
stṛptyarthaṃ śivabhāvamaṅgalakaraṃ citraṃ tadarcāphalam
|| 42 ||

pavitrabhūtasya pavitradānaṃ
tāpatrayaghnaṃ sakalārthasiddhyai |
japaśca bhaktyā praṇatiḥ śivasya
brahmendraviṣṇvādi padatvahetuḥ || 43 ||

arcane sakalaṃ jape sakalākalaṃ satatoditaṃ
niṣkalaṃ sakalādhvagaṃ paripūrṇamātmasamarpaṇe |
vyomni susphaṭikaprabhaṃ bhavane kalāsahitaṃ haraṃ
yo hi vetti paraṃ śivaṃ śiva eva so.astra na saṃśayaḥ
|| 44 ||

bhūyaḥ pūjanamīśasannidhikaraṃ saṃprārthanaṃ sveśayoḥ
anyonyaṃ tvavalokanāya bhuvane bhogāya sādāśive |
īśāgnyarcanamarpaṇaṃ kṣapayituṃ bandhatrayaṃ karmaṇo
jñeyaṃ svātmanivedanaṃ paraśive sthityarthamevātmanaḥ
|| 45 ||

aśuddhatattvaughabahiṣkriyārthaṃ
parāṅmukhārghyaṃ parameśvarasya |
yasminnavasthānakaraṃ visargaṃ
kurvan sa śaivaṃ padamabhyupeti || 46 ||

viprottuṅgaścoladeśī ca sūriḥ
śambhoḥ pūjāstotrametatpavitram |
siddhāntajño jñānaśambhuḥ śivoktyā
cakre bhaktyā bhuktaye muktaye ca || 47 ||

||iti śivam ||

www.kamakotimandali.com